## अभ्यासपत्रम् २



(४, ५, ६ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) सुदास: मालाकार आसीत् ।

आ) सुगत: सुदासाय कमलार्थम् अधिकमूल्यं यच्छति ।

इ) कमलस्य विकासेन तडाग: विभूषित: ।

ई) एतद् विश्वम् अणुभि: निर्मितम् ।

उ) द्रव्यस्य आदिम: घटक: परमाणु: अस्ति ।

ऊ) अर्णव: क्षेत्रात् तण्डुलान् आनयति ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) शिशिर-ऋतौ एकं ________ व्यकसत् । (पद्मम्/जपाकुसुमम्)

आ) अहो महिमा ________ । (परमात्मन:/मानवस्य)

इ) पूजार्थमिदं कमलम् ________ । (विक्रीणे/अभ्यर्थये)

ई) अहं दश ________ यच्छामि । (रुप्यकाणि/सुवर्णनाणकानि)

उ) अर्णव: ________ गृहीत्वा प्रविशति । (जपाकुसुमम्/कमलम्)

ए) एतद् विश्वं ________ निर्मितम् । (अणुभि:/तण्डुलै:)

**३. क्रमेण योजयत ।**

अ) १. श्रेष्ठिन: सार्थवाहस्य च विवाद: । २. शिशिर-ऋतौ पद्मस्य विकास: ।
३. सुदास: विक्रयणार्थं राजसद्मन: पुरत: स्थित: । ४. सुदासस्य धनप्राप्ते: इच्छा ।

आ) १. सुदासस्य सुगतनिवासं प्रति आगमनम् । २. सुदासस्य सुगतदर्शनम् ।
३. सुगतस्य आशीर्वादप्रदानम् । ४. सुगतदर्शनात् बहुमूल्यस्य अपेक्षाया: विस्मरणम् ।

इ) १. पितु: स्वस्य महाविद्यालये निमन्त्रणम् । २. 'वैशेषिकसूत्राणि' इति ग्रन्थविषये चर्चा ।
३. पित्रा कणादमहर्षे: सिद्धान्तविषये कथनम् । ४. अर्णवस्य विस्तरेण पठनस्य इच्छा ।

**४. समासविग्रहं कुरुत ।**

बालसूर्यबिम्बम्, राजसद्म, पूजार्थम्, भक्तिरसार्णव:, सविनयम्, पुस्तकपठनम्, परागकणा:, सूक्ष्मकणा:, कणादमुनि:, परमाणु:, अल्पधी:, मदान्ध:, किञ्चिज्ज्ञ:, उद्यानपाल:, शिशिर-ऋतु:, नीरजम्, दर्शनार्थम्, महात्मा, अश्मखण्ड:, हस्तस्थम्, जपाकुसुमम् ।

**५. उचितं कारणं चिनुत ।**

अ) सुदास: राजसद्मन: पुरत: स्थित: यत: ________________ ।
१. स: सरसिजं विक्रेतुम् इच्छति स्म । २. स: राजानं द्रष्टुम् इच्छति स्म ।

आ) सार्थवाह: सुदासाय शतसुवर्णनाणकानि दातुम् उद्युक्त: यत: ________________ ।
१. स: सुदासस्य साहाय्यं कर्तुम् इच्छति स्म । २. स: सुदासात् कमलं क्रेतुम् इच्छति स्म ।

इ) सुदास: नीरजं सुगतचरणाभ्यां समर्पितवान् यत: ________________ ।
१.सुगत: सुदासाय अधिकं धनं यच्छति । २. सुदासस्य मनसि भक्तिरस: अजायत ।


ई) पिता अर्णवाय स्वमहाविद्यालयम् आगन्तुं कथयति यत: ________________ ।
१. पितु: महाविद्यालये कणादविषयकाणि पुस्तकानि सन्ति ।
२. पितु: महाविद्यालये स्नेह-सम्मेलनम् अस्ति ।

### ६. तालिकां पूरयत ।

| वक्त्रा संवादं मेलयत | |
|---|---|
| सार्थवाहः | उद्यानपालः |
| | |
| | |

(मञ्जूषा – एकेन सुवर्णनाणकेन, अहं शतं सुवर्णनाणकानि प्रयच्छामि, नैतद् विक्रेतुमिच्छामि, तत् कियता मूल्येन ददासि?)

### ७. स्थानाधारेण शब्दपेटिकां पूरयत ।



(वटवृक्षः, नगरम्, अश्मखण्डः, उद्यानम्)

### ८. नामतालिकां पूरयत ।

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ———— | अप्सरोभ्याम् | ———— | तृतीया |
| दयावतः | ———— | ———— | षष्ठी |
| ———— | दृग्भ्याम् | ———— | चतुर्थी |

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ———— | शाखिनौ | ———— | प्रथमा |
| रज्जवे | ———— | ———— | चतुर्थी |
| सवितारम् | ———— | ———— | द्वितीया |

## पठत-बोधत

### सतिसप्तमी – रचना

'सतिसप्तमी' इति संस्कृतभाषायाः सौन्दर्यपूर्णा विशेषरचना । यथा –

१) **अस्तङ्गते सवितरि** क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः ।

→ यदा सविता अस्तङ्गतः तदा क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः ।

२) तस्य तडागे **सत्यपि शिशिर-ऋतौ** एकं पद्मं व्यकसत् ।

→ यद्यपि शिशिर-ऋतुः आसीत् तथापि तस्य तडागे एकं पद्मं व्यकसत्।

३) एवम् **उक्तवति सुगते** निरिच्छः सुदासः प्रत्यवदत् ।

→ यदा सुगतः एवम् उक्तवान् तदा निरिच्छः सुदासः प्रत्यवदत्।